प्रकृतिं पुरुषं चैव क्षेत्रं क्षेत्रज्ञमेव च ।

एतद्वेदितुमिच्छामि ज्ञानं ज्ञेयं च केशव ॥ १३.१ ॥

prakṛtiṁ puruṣaṁ caiva kśetraṁ kśetrajñameva ca ।
etadveditumicchāmi jñānaṁ jñeyaṁ ca keśava ।। 13.1।।

श्रीभगवानुवाच ।

śrībhagavānuvāca ।

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।

एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः ॥ १३.२ ॥

idaṁ śarīraṁ kaunteya kśetramityabhidhīyate ।
etadyo vetti taṁ prāhuḥ kśetrajña iti tadvidaḥ ।। 13.2।।

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।

क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥ १३.३ ॥

kśetrajñaṁ cāpi māṁ viddhi sarvakśetreṣu bhārata ।
kśetrakśetrajñayorjñānaṁ yattajjñānaṁ mataṁ mama ।। 13.3।।

तत्क्षेत्रं यच्च यादृक्क यद्विकारि यतश्च यत् ।

स च यो यत्प्रभावश्च तत्समासेन मे शृणु ॥ १३.४ ॥

tatkśetraṁ yacca yādṛkca yadvikāri yataśca yat ।
sa ca yo yatprabhāvaśca tatsamāsena me śṛṇu ।। 13.4।।

ऋषिभिर्बहुधा गीतं छन्दोभिर्विविधैः पृथक् ।

ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ॥ १३.५ ॥

ṛṣibhirbahudhā gītaṁ chandobhirvividhaiḥ pṛthak ।
brahmasūtrapadaiścaiva hetumadbhirviniścitaiḥ ।। 13.5।।